International Journal of Jyotish Research
(वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2018; 3(1): 14-16
© 2018 Jyotish
www.jyotishajournal.com
Received: 05-11-2017
Accepted: 06-12-2017

**डॉ. सूर्यनारायण गौतम**
वेदाचार्यः सह आचार्यः–श्री जे.जे.टी. विश्वविद्यालय, झुन्झुनू, राजस्थान, भारत

**Correspondence**
**डॉ. सूर्यनारायण गौतम**
वेदाचार्यः सह आचार्यः–श्री जे.जे.टी. विश्वविद्यालय, झुन्झुनू, राजस्थान, भारत

# पुरुषसूक्तस्य सामाजिकवैशिष्ट्यम्

**डॉ. सूर्यनारायण गौतम**

## प्रस्तावना

स्वीकृता खलु वेदत्रयी चतुष्टयी वा विद्वद्भिः। तत्र वर्णनविधानेन विभागो दरीदृश्यते। यद्यपि आदिकालिकानां ऋषीणां चिन्तनेन यदुद्भूतं तच्छकलज्ञानराशिरेव 'वेद' इति ज्ञेयम्।

वेद विषये व्यंजनाविधानेन नैकविध जनश्रुतिरूपाः कथाः प्रसरितास्सन्ति जनानां मध्ये। तत्र खलु एका पौराणिकी कथा वर्तते–'एकदा कोऽपि दैत्यः वेदमादाय रसातले स्थापितः। अतः पृथिव्यां वेदज्ञानं अदृश्यमासीत्। यदा वेदज्ञान विरहितो जनाः अभूवन् तदाकाले सर्वत्र अनाचारस्य, पापाचारस्य, कदाचारस्य वा ताण्डवः एव दरीदृश्यते खलु। एवं दृष्ट्वा तात्कालिकाः ऋषयः जगदीश्वरं अप्रार्थयन्। तेषां करुणक्रन्दनं श्रुत्वा जगदीश्वरः हयग्रीवस्वरूपं अधारि वेदरक्षणं कृतः। तेन पुनः वेदानां प्रतिष्ठा कृता। अनन्तरं बहुकालव्यतीते सति पुनः सामाजिकानां मध्ये वेदज्ञानस्य तिरोभावो जातः। एवं दृष्ट्वा पुनः महर्षि पारासरेण बादरायणं उत्पादितः। स पारासरीयो बादरायण एव वेद विव्यसनाद् 'भगवान् वेदव्यास' इति उपाधिना विभूषितः। तेषामपराभिधानम् कृष्ण द्वैपायनमेव श्रूयते खलु। अनन्तरं काले–काले अस्मद्देशीयैः तथैव वैदेशिक विद्वद्भिरपि वेदानामध्ययनमध्यापनमभूत्। तस्योपबृंहणे रचिताश्चजाता नैकविध ग्रन्थाः। तस्य साहित्यमपि जगत्यां अतीव विपुलः। वेद विषयिकी उक्तिः। यथा–'यद्वेदे तल्लोके, यल्लोके तद्वेदे।'

अतः सिद्धमिदं वेदानां महत्त्वम्। तत्र वेदे बहवो मन्त्राः सूक्ताश्च विद्यन्ते। तेषु सूक्तेषु ऋषि–देवता–छन्दोभिराबद्धाः लोकोपकारकाः मन्त्रमुक्ताः राराजन्ते। क्वचित्तु कश्चिदाकांक्षापूर्त्यर्थं कश्चिदृषिः कस्याश्चिद्देवतायै श्रद्धयाहुतिं प्रयच्छति। क्वचित्तु परिदेवनां करोति। क्वचिदपि शपथाऽभिशापः क्वचित्तु आशीर्वादरेव भवति। क्वचित्तु औषधविज्ञानम्[1] चिकित्साविज्ञान०च पशुपालनं गोरक्षणम् क्वचिदप्यभिचारकर्मणात्मरक्षोपायाः प्रभृति जीवनोत्सर्ग पर्यन्तम् विषयाः विनिबद्धास्सन्ति। एवं मानवजीवनस्य सर्वविध कल्याणाय सर्वत्र मार्गदर्शनं कृतम् विद्यते। एवमेव वेदे सर्वत्र सामाजिकजीवनस्य शिक्षायै येनकेनविधानेन मन्त्रा निगदितास्सन्ति।

अस्माकमार्याणां समाजः चतुर्षु वर्गेषु विभक्तः। तत्र ब्राह्मण–क्षत्रिय–वैश्य–शूद्रादि विधानेन कल्पना कृता। सर्वे वर्णाः परमात्मनः एवोत्पन्नाः अतः सर्वेषां जीवनस्याधिकारः कर्त्तव्यश्च सदृशमेव। समाजे शिक्षा–स्वास्थ्य–सुरक्षा–सेवायाः आवश्यकतानिवार्या समाना चैव। ये जनाः समाजचिन्तकाः, उपासकाः, ते ब्राह्मणाः। ये स्वास्थ्यलाभं कृत्वा बुद्ध्या, बलेन राष्ट्र–समाजस्य सेवाकार्येषु संलग्नाः ते क्षत्रियाः, ये विषु अर्थात् व्यापकत्वात् संचरणशीलत्वात्सर्वत्र गमनागमनं कृत्वा सर्वोपयोगीनि वस्तूनि संगृह्य समाजे उचितमूल्येन वितरन्ति ते वैश्याः। अन्ये च ये शरीरतः कार्यंकृत्वा न केवलं स्वजीवनयापनं कुर्वन्ति अपितु सेवां दत्वा समाजस्य कार्यमपि सुलभं कुर्वन्ति ते शूद्रादयः। अतः समाजे दृश्यते खलु ब्राह्मण वर्गे केवलं ब्राह्मणः क्षत्रिय वर्गे केवलं क्षत्रियः, एवमेववैश्य वर्गेऽपि द्रष्टुं शक्नुमः। परन्तु शूद्राणां संख्या सर्वेषां मध्ये अधिका एव। अस्य कारणमेवास्ति कार्यस्य विभाजनम्।

शूद्रवर्गे बहव्यो जातिभेदाः दृश्यन्ते खलु। यथाऽयं लौहकारः, कुम्भकारः मालाकारः स्वर्णकारः नाविकः नापितः रजकः इत्यादि।

समाजे शिक्षकाणां संख्या शिक्षार्थिणामाधारिता वर्तते। यदि समाजे ब्राह्मणानां संख्याधिका भविष्यति तर्हि तेऽध्यापनं केन सह करिष्यन्ति। एवमेव सुरक्षाया आवश्यकता वर्तते खलु सर्वदैव परञ्च तेषामपि संख्या निश्चिता करणीयमावश्यकम्। किन्तु समाजे लौहपात्रस्य, काष्ठपात्रस्य, मृद्भाण्डस्य, जीवनोपयोगीनि सर्वाणि वस्तूनि यथा– वस्त्रनिर्मात्रृजनाः, वस्त्रप्रक्षालकः, चतुर्थवर्णेन अर्थात् शूद्रादेव सर्वस्मै प्राप्तुम् शक्नोति। कोऽपि वनोपवनानां संरक्षणं कृत्वा सर्वस्मै फलं प्रयच्छति, कोऽपि पुष्पाणि चिनोति स मालाकारः भवति, कोऽपि शिल्पकारः गृहरचयित्वा छायां सुरक्षां च प्रयच्छति। केचन् तु पशुपालयित्वा समाजाय दुग्ध–घृतादिक पदार्थानामापूर्तिं कुर्वन्ति। अतः वेदे उक्तं 'पद्भ्यां शूद्रोऽजायत्' अर्थात् शूद्रः समाजस्य पादः येन समाजः गतिं प्राप्नोति। एवं सर्वत्रापि ज्ञेयम्। वैश्य वर्गेऽपि द्रष्टुं शक्नुमः। परन्तु शूद्राणां संख्या सर्वेषां मध्ये अधिका एव। अस्य कारणमेवास्ति कार्यस्य विभाजनम्।शूद्रवर्गे बहव्यो

जातिभेदाः दृश्यन्ते खलु। यथाऽयं लौहकारः, कुम्भकारः मालाकारः स्वर्णकारः नाविकः नापितः रजकः इत्यादि। समाजे शिक्षकाणां संख्या शिक्षार्थिणामाधारिता वर्तते। यदि समाजे ब्राह्मणानां संख्याधिका भविष्यति तर्हि तेऽध्यापनं केन सह करिष्यन्ति। एवमेव सुरक्षाया आवश्यकता वर्तते खलु सर्वदैव परञ्च तेषामपि संख्या निश्चिता करणीयमावश्यकम्। किन्तु समाजे लौहपात्रस्य, काष्ठपात्रस्य, मृद्भाण्डस्य, जीवनोपयोगीनि सर्वाणि वस्तूनि यथा– वस्त्रनिर्मात्रृजनाः, वस्त्रप्रक्षालकः, चतुर्थवर्णेन अर्थात् शूद्रादेव सर्वस्मै प्राप्तुम् शक्नोति। कोऽपि वनोपवनानां संरक्षणं कृत्वा सर्वस्मै फलं प्रयच्छति, कोऽपि पुष्पाणि चिनोति स मालाकारः भवति, कोऽपि शिल्पकारः गृहरचयित्वा छायां सुरक्षां च प्रयच्छति। केचन् तु पशुपालयित्वा समाजाय दुग्ध–घृतादिक पदार्थानामापूर्तिं कुर्वन्ति। अतः वेदे उक्तं 'पद्भ्यां शूद्रोऽजायत्' अर्थात् शूद्रः समाजस्य पादः येन समाजः गतिं प्राप्नोति। एवं सर्वत्रापि ज्ञेयम्।

पुरुषसूक्तम् चतुर्षु वेदेषु उपलभ्यते। सूक्तेऽस्मिन् पुरुषस्य विराट् स्वरूपस्य वर्णनं राजते। स विराट्पुरुषः अस्य समस्तस्य ब्रह्माण्डस्य मूलकारणं वर्तते। ऋग्वेदीय पुरुषसूक्ते षोडश मन्त्रा निबद्धास्सन्ति। शुक्लयजुर्वेदे एकविंशत्तमेऽध्याये द्वाविंशति मन्त्रात्मकं एतत्पुरुषसूक्तमम्वर्तते, किन्तु सामवेदे तु केवलं पञ्चैव मन्त्राः कथितास्सन्ति। सूक्तस्य नामकरणं पुरुष विषयकं व्याख्यानमेव सिद्धम्। यथा–

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं स्पृत्वात्यतिष्ठद्दशांगुलम्।।[1]

अनेनैव सामवेदे अथर्ववेदेऽपि कञ्चन भेदोपभेदं गृहीत्वा मन्त्रा निगदिताः वर्तन्ते। यथा–

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं सर्वतो वृत्यात्यतिष्ठद्दशांगुलम्।।[2]

अत्र सामवेदे एते मन्त्रा पुरुषरूपेणावस्थिताः परमात्मानं व्याख्यायन्ते ताः पृथक्रूपेण पुरुषसूक्तेन नहि कथितास्सन्ति। अत्र तु अग्निसूक्ते एव वर्णितास्सन्ति। सामवेदे पुरुषाख्य मन्त्रस्य दृष्टा नारायण ऋषिः। पुरुषो देवता। अनुष्टुप्छन्दः अस्ति। सूक्तस्य आदितः त्रिषु मन्त्रेषु सृष्टेः कारणभूतं विराट्पुरुषस्य स्वरूपवर्णनमुपलभ्यते। वेदे निगदितः पुरुषः अचिन्त्यरूपः संसारात्परो भिन्नो वा वर्तते। वेदे सहस्र इति पदं भाष्यकारानुसारेण अनन्त इत्यर्थे वर्तते। अतः यत्र सहस्रशीर्षा उल्लिखितम् तत्र तच्छब्दस्य भावः अनन्तशीर्षेण युक्तः इति। एवमेव अन्यत्रापि बोध्यम्।

इदं दृश्यमानं जगत् विराट् पुरुषस्य पादमात्रं विद्यते। अतः अस्य विषये उक्तम्–

''त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः''[3]

अस्य मन्त्रस्य व्याख्याने महर्षि दयानन्देन परमात्मानं 'अग्नि' इति पदेन संसूच्यते। स विराट्पुरुषः कालत्रयस्य नियामको वर्तते खलु। उक्तञ्च–

''पुरुष ए वेदँ सर्वं यद्भूतं यच्च भाव्यम्''[4]

चतुर्थ मन्त्रे सृष्टिप्रक्रियायाः विधानं क्रियते। तस्मात् परमपुरुषात् विराटजायत विराजत्वाज्जीवात्मा पुरुषः उत्पन्नो बभूव। ततः पृथिव्यादि निवासस्थानं विकासः समभवत्। यथा–

''पश्चाद्भूमिः अथो पुरः''[5]

अत्र पुर शब्दस्य भावः पुर, ग्रामो वा निवासस्थानम्। सूक्ते यस्य पुरुषस्य चित्रणं विद्यते सोऽपि पुरुषमध्ये एव शेते। तेषां विषये भाष्यकाराः कथयन्ति–''पुरि अस्यां शेते इति पुरुषः'' अर्थात् सर्वेषां जीवानां अन्तःकरणे यः शयनं करोति। निवसति स एव पुरुषः न चात्र पुंस धर्मयुतः कश्चिज्जीवः।

पुरुषसूक्ते एकः यज्ञः वर्णितः। स प्रकृत्यया संपादितः अतः स प्रकृति यागः। आदौ देवा ( दिव्य पदार्थाः यथा–पञ्च महाभूतादयः) यज्ञं चक्रुः। तस्मात् यज्ञ प्रभावात् दृश्यमान प्रपञ्चानामुत्पत्तिः कल्प्यते। यथा–

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानं सचन्त यत्र पूर्वे साध्याः सन्ति देवाः।।[6]

अस्य यज्ञस्य संभारभूताः पार्थिव पदार्थाः नैवासनपितु वर्षपर्यन्तं भोग्यमानाः ऋतवः नानाविधा भूत्वैव तं आदिर्यज्ञस्य अर्थात् प्रकृतियज्ञस्य सम्भाराः अभूवन्। यथा–

''वसन्तोस्यासीदाज्यं ग्रीष्मइध्मः शरद्धविः''[7]

यदा देवानां यज्ञं साफल्यतामभजत्तदा पृषदाज्यम् अर्थात् दधिमिश्रितं आज्यं घृतं वा अलभन्त देवाः। ततश्च खेचराणामुत्पत्तिः, वनेचराणामपि तथैव अन्ये च ये ग्रामीणाः पशवश्चोत्पन्नाः। यथा–

तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृशदाज्यम्।
पशूंस्तांश्चक्रे वायव्या नारण्या ग्राम्याश्च ये।।[8]

तस्मात् यज्ञात् ऋग्वेदादि चत्वारो वेदाः, अश्वादयो पशवः, ब्राह्मण क्षत्रिय, वैश्य, शूद्रादि चत्वारो वर्णाः समभूवन्। चन्द्रादीनि नक्षत्राणि, इन्द्रादयो देवाः अन्येषाञ्च लोकलोकादीनां उत्पत्तिर्जाता। उक्तं च–

तस्माद्यज्ञात्सर्व ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत्।।
तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तस्मादजावयः।।
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत।।[9]

अस्य यज्ञस्य सम्पादनं भौतिकैः सम्भारैः न सम्भवति यतोहि बाह्यसम्भारशून्यः अध्यात्मज्ञानविज्ञानयुक्तः आधिदैविकः कश्चित् यज्ञः वर्तते। अयं यज्ञः प्रकृतौ सर्वदैव प्रचलत्येव। तत्त्ववेत्तारः यद्येतं कर्तुं इच्छेयुः तदवश्यमेव समाधौ सर्वहुत यज्ञस्य सम्पादनं भवेत्। अस्य विषये चिन्तकानां कथनमस्ति–

''पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्''[10]

इत्यत्र एकेश्वरवादस्य सिद्धान्तः प्रस्फुटितः। सर्वत्र पुरुषस्यभावना कार्या। स पुरुषः सर्वत्र चेतनाचेतनेषु परिचायको भवति। यस्य कस्यापि संसारे अवस्थितिः वर्तते तत्सर्वं पुरुषस्य वैशिष्ट्येन एव। यदि पाषाणस्य पाषाण रूपे प्रसिद्धिः वर्तते तत्रापि हेतुः पुरुष एव। तत्पुरुषेणानुकम्पया एव किञ्चिद्वस्तुः वस्तु इति सत्तां प्राप्नोति। तस्य रहितविधानेन पत्राण्यपि दोलायमानाः नैव जायन्ते। एवमेव चिन्तनेन कश्चिदृषिः कथयति–

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽनाय।।[11]

अर्थात् अहं ज्योतिस्वरूपकं तत्पुषविषये किञ्चिज्जानामि। तस्य महिमा स्वरूपश्चावर्णनीयौ विद्येते खलु। यः तद्विषये जानाति स मृत्युं तरति, तत्कृते तु न किमप्यन्नं ज्ञातुमर्हः।

अतः वयं निष्कर्षरूपेण कथयितुं शक्नुमः यत् वेदे वर्णितानां सूक्तानां मध्ये पुरुषसूक्तस्य वैशिष्ट्यं सर्वोपरि राराजते। यतो हि तत्र

जगदुत्पत्ति कारणतः पुरुषार्थचतुष्टयं अर्थात् मोक्षपर्यन्तं अल्पाक्षरैरल्पशब्दैः वा ज्ञानबीजं यथा प्रदर्शितं वर्तते तथान्यत्र दुर्लभो एव। अतः सामाजिक समरसतायै पुरुष सूक्तस्याध्ययनमध्यापनं परमावश्यकम्। एवं विचिन्त्यैव अस्माकं पूर्वजाः पूजन कर्मणि, आगतानां स्वागतावसरे, शान्तिकर्मणि, पौष्टिककर्मणि च अस्य सूक्तस्य विनियोगः कृतः।

**सन्दर्भाः–**


1. आपो वाता ओषधयः
   स्तान्येकस्मिन्भुवन आर्पितानि।।
   (अथर्ववेद संहिता 18/1/77)
2. यथा वृकादजावयो धावन्ति बहु विभ्यतीः।
   एषा त्वं दुन्दुभे अमित्रानमि क्रन्द
   त्रासयावो चित्तानि मोहय।।
   (ऋग्वेद संहिता 10.180.2)
3. सामवेद संहिता षष्ठाध्याये चतुर्थी
   दशतिः मन्त्र 3
4. सामवेदे षष्ठाध्याये चतुर्थी दशतिः मन्त्र 617
5. ऋग्वेद संहिता
6. ऋग्वेद संहिता
7. ऋग्वेद संहिता
8. शुक्ल यजुर्वेद संहिता 31/16
9. शुक्ल यजुर्वेद संहिता 31/14
10. ऋग्वेद संहिता
11. ऋग्वेद संहिता
12. ऋग्वेद संहिता
13. शुक्ल यजुर्वेद संहिता 31/ 18